तृतीयः पाठः

# सर्वनामशब्दाः (भाग-१)

## पुल्लिङ्गम्

| प्रथमपुरुषः | | |
|---|---|---|
| सः | तौ | ते |
| एषः | एतौ | एते |
| कः ? | कौ ? | के ? |





सः बालकः।

सः लिखति।

सः बालकः लिखति।





तौ बालकौ।

तौ लिखतः।

तौ बालकौ लिखतः।





ते बालकाः।

ते लिखन्ति।

ते बालकाः लिखन्ति।





एषः चषकः

एषः चषकः अस्ति।





एतौ चषकौ।

एतौ चषकौ स्तः।

एते चषका:

एते चषका: सन्ति।



| | | |
|---|---|---|
| स: नर:। | तौ नरौ। | ते नरा:। |
| स: चलति। | तौ चलत:। | ते चलन्ति। |
| स: नर: चलति। | तौ नरौ चलत:। | ते नरा: चलन्ति। |
| स: सैनिक: रक्षति। | तौ सैनिकौ रक्षत:। | ते सैनिका: रक्षन्ति। |
| एष: मयूर: नृत्यति। | एतौ मयूरौ नृत्यत:। | एते मयूरा: नृत्यन्ति। |
| एष: शिक्षक: अस्ति। | एतौ शिक्षकौ स्त:। | एते शिक्षका: सन्ति। |
| एष: मूषक: अस्ति। | एतौ मूषकौ स्त:। | एते मूषका: सन्ति। |
| क: बालक:? | कौ बालकौ? | के बालका:? |



प्रश्न: - स: क:?
उत्तरम् - स: वानर:।



प्रश्न: - तौ कौ?
उत्तरम् - तौ गोलदीपौ।



प्रश्न: - ते के?
उत्तरम् - ते खगा:।

## अभ्यास:

१. उचितं मेलयत -

| | (अ) | (ब) |
|---|---|---|
| (क) | स: | खादन्ति |
| (ख) | मयूर: | रक्षत: |
| (ग) | नर: | पिबन्ति |
| (घ) | सैनिकौ | पठति |
| (ङ) | गजा: | हसत: |
| (च) | ते | नृत्यति |
| (छ) | एतौ | सन्ति |
| (ज) | एते | गच्छति |

२. पठित्वा वाक्यानि रचयत -

यथा - सः नरः गच्छति।

| मूलशब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| तद् | सः | तौ | ते |
| एतद् | एषः | एतौ | एते |
| किम् | कः | कौ | के |
| नर | नरः | नरौ | नराः |
| अस् | अस्ति | स्तः | सन्ति |
| गम् | गच्छति | गच्छतः | गच्छन्ति |

## स्त्रीलिङ्गम्

| प्रथमपुरुषः | | |
|---|---|---|
| सा | ते | ताः |
| एषा | एते | एताः |
| का? | के? | काः? |





सा बालिका।

सा क्रीडति।

सा बालिका क्रीडति।

ते बालिके।

ते क्रीडतः।

ते बालिके क्रीडतः।









ताः बालिकाः।

ताः क्रीडन्ति।

ताः बालिकाः क्रीडन्ति।



एषा पेटिका।

एषा पेटिका अस्ति।

एते माले।

एते माले स्तः।





एताः महिलाः।

एताः गायन्ति।

एताः महिलाः गायन्ति।

सा घटी।

सा घटी अस्ति।





ते द्रोण्यौ।

ते द्रोण्यौ स्तः।

ताः लेखन्यः।

ताः लेखन्यः सन्ति।



| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| सा | ते | ताः |
| एषा | एते | एताः |
| का? | के? | काः? |
| सा छात्रा | ते छात्रे | ताः छात्राः |
| सा माला | ते माले | ताः मालाः |
| एषा महिला | एते महिले | एताः महिलाः |
| एषा पेटिका | एते पेटिके | एताः पेटिकाः |
| का घटी? | के घट्यौ? | काः घट्यः? |
| का माला? | के माले? | काः मालाः? |
| सा लेखनी | ते लेखन्यौ | ताः लेखन्यः |
| एषा नदी | एते नद्यौ | एताः नद्यः |



प्रश्नः - एषा का?

उत्तरम्- एषा लेखनी।



प्रश्नः - एते के?

उत्तरम्- एते पुस्तके।



प्रश्नः - एताः काः?

उत्तरम्- एताः घट्यः।

## अभ्यासः

१. उचितं मेलयत -

| | (अ) | (ब) |
|---|---|---|
| (क) | सा | लिखन्ति |
| (ख) | एते | गच्छति |
| (ग) | काः | हसति |
| (घ) | बालिकाः | खादतः |
| (ङ) | एषा | उत्तिष्ठति |
| (च) | के | पठन्ति |
| (छ) | ताः | खेलन्ति |
| (ज) | का | उपविशतः |

२. पठित्वा वाक्यानि रचयत -

यथा - सा बालिका गच्छति।

| मूलशब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| तद् | सा | ते | ताः |
| एतद् | एषा | एते | एताः |
| किम् | का | के | काः |
| बालिका | बालिका | बालिके | बालिकाः |
| लेखनी | लेखनी | लेखन्यौ | लेखन्यः |
| अस् | अस्ति | स्तः | सन्ति |
| गम् | गच्छति | गच्छतः | गच्छन्ति |

# नपुंसकलिङ्गम्

| प्रथमपुरुषः | | |
|---|---|---|
| तत् | ते | तानि |
| एतत् | एते | एतानि |
| किम्? | के? | कानि? |




तत् पुस्तकम्।

तत् अस्ति।

तत् पुस्तकम् अस्ति।

ते पुस्तके।

ते स्तः।

ते पुस्तके स्तः।






तानि पुस्तकानि।

तानि सन्ति।

तानि पुस्तकानि सन्ति।

एतत् व्यजनम्।

व्यजनं भ्रमति।

एतत् व्यजनं भ्रमति।






एते व्यजने।

व्यजने भ्रमतः।

एते व्यजने भ्रमतः।

एतानि व्यजनानि।

व्यजनानि भ्रमन्ति।

एतानि व्यजनानि भ्रमन्ति।




| एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|
| तत् फलम् | ते फले | तानि फलानि |
| तत् पुष्पम् | ते पुष्पे | तानि पुष्पाणि |
| तत् पर्णम् | ते पर्णे | तानि पर्णानि |
| एतत् व्यजनम् | एते व्यजने | एतानि व्यजनानि |
| एतत् वाहनम् | एते वाहने | एतानि वाहनानि |
| एतत् गृहम् | एते गृहे | एतानि गृहाणि |
| तत् किम्? | ते के? | तानि कानि? |
| एतत् किम्? | एते के? | एतानि कानि? |



प्रश्नः - तत् किम्?
उत्तरम्- तत् वायुयानम्।
प्रश्नः - तत् किं गच्छति?
उत्तरम्- तत् वायुयानं गच्छति।



प्रश्नः - ते के?
उत्तरम्- ते वायुयाने।
प्रश्नः - ते के गच्छतः?
उत्तरम्- ते वायुयाने गच्छतः।



प्रश्नः - तानि कानि?
उत्तरम्- तानि पुष्पाणि।
प्रश्नः - तानि कानि विकसन्ति?
उत्तरम्- तानि पुष्पाणि विकसन्ति।

## अभ्यासः

१. उचितं मेलयत-

| | (अ) | (ब) |
|---|---|---|
| (क) | सः | खादन्ति |
| (ख) | एषा | भ्रमति |
| (ग) | के | लिखतः |
| (घ) | कानि | उपविशति |
| (ङ) | ते | गच्छति |
| (च) | एतत् | चलन्ति |
| (छ) | किम् | पतन्ति |
| (ज) | ताः | हसतः |
| (झ) | एतौ | उत्तिष्ठति |

२. उचितं मेलयत–

| | (अ) | (ब) |
|---|---|---|
| (क) | एषः | व्यजनम् |
| (ख) | किम् | बालकः |
| (ग) | कानि | महिला |
| (घ) | एते | गायिकाः |
| (ङ) | एतत् | याने |
| (च) | सा | नराः |
| (छ) | एताः | हस्तौ |
| (ज) | ते | नेत्रे |
| (झ) | के | पत्राणि |
| (ञ) | एतौ | गृहम् |

३. पठित्वा वाक्यानि रचयत - यथा– तत् पुस्तकम् अस्ति।

| मूलशब्दः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| तद् | तत् | ते | तानि |
| एतद् | एतत् | एते | एतानि |
| किम् | किम् | के | कानि |
| पुस्तक | पुस्तकम् | पुस्तके | पुस्तकानि |
| यान | यानम् | याने | यानानि |
| पठ् | पठति | पठतः | पठन्ति |
| लिख् | लिखति | लिखतः | लिखन्ति |

४. वाक्यानि रचयत -

यथा - सः शिक्षकः गच्छति।

| सर्वनाम | संज्ञा | क्रिया |
|---|---|---|
| सः | | |
| एषः | | गच्छति |
| कः | बालिका | पतति |
| सा | शिक्षकः | नृत्यति |
| एषा | फलम् | अस्ति |
| का | लेखनी | पठति |
| एतत् | | लिखति |
| किम् | | |

५. वाक्यानि रचयत -

यथा - ते बालकाः गच्छन्ति।

| सर्वनाम | संज्ञा | क्रिया |
|---|---|---|
| ते | | |
| एते | | पतन्ति |
| के | महिलाः | सन्ति |
| ताः | बालकाः | गच्छन्ति |
| एताः | पत्राणि | लिखन्ति |
| काः | घट्यः | नृत्यन्ति |
| तानि | | पठन्ति |
| एतानि | | |
| कानि | | |

# सर्वनामशब्दाः (भाग-२)

## युष्मद् पुल्लिङ्गे स्त्रीलिङ्गे च

| मध्यमपुरुषः | | |
|---|---|---|
| त्वम् | युवाम् | यूयम् |



त्वं पठसि।

युवां पठथः।





यूयं पठथ।

त्वं लिखसि।





युवां लिखथः।

यूयं लिखथ।



| | | |
|---|---|---|
| त्वं खादसि | युवां खादथः। | यूयं खादथ। |
| त्वं खेलसि | युवां खेलथः। | यूयं खेलथ। |
| त्वं हससि। | युवां हसथः। | यूयं हसथ। |
| त्वं धावसि | युवां धावथः। | यूयं धावथ। |
| त्वं उत्तिष्ठसि | युवां उत्तिष्ठथः। | यूयं उत्तिष्ठथ। |
| त्वं उपविशसि | युवां उपविशथः। | यूयं उपविशथ। |
| त्वं छात्रः असि। | युवां छात्रौ स्थः। | यूयं छात्राः स्थ। |

## अस्मद् पुल्लिङ्गे स्त्रीलिङ्गे च

उत्तमपुरुषः
अहम् आवाम् वयम्



अहं छात्रः।
अहं पठामि।

आवां छात्रौ।
आवां पठावः





वयं छात्राः।
वयं पठामः।



अहं बालिका।
अहं लिखामि।

आवां बालिके।

आवां लिखाव:।





वयं बालिका:।

वयं लिखाम:।

| | | |
|---|---|---|
| अहं खादामि। | आवां खादाव:। | वयं खादाम:। |
| अहं गच्छामि | आवां गच्छाव:। | वयं गच्छाम:। |
| अहम् आगच्छामि | आवाम् आगच्छाव:। | वयम् आगच्छाम:। |
| अहं क्रीडामि | आवां क्रीडाव:। | वयं क्रीडाम:। |
| अहं बालक: अस्मि | आवां बालके स्व:। | वयं बालका: स्म:। |

## अभ्यास:

१. उचितं मेलयत -

| | (अ) | (ब) |
|---|---|---|
| (क) | अहं | पचति |
| (ख) | त्वं | खादति |
| (ग) | आवां | वदति |
| (घ) | युवां | हसाम: |
| (ङ) | वयं | पश्यथ |
| (च) | यूयं | पिबति |
| (छ) | एष: | चलथ: |
| (ज) | क: | लिखाव: |
| (झ) | एषा | पठसि |
| (ञ) | सा | गच्छामि |

२. पठित्वा वाक्यानि रचयत -

यथा - सः पठति।

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | सः | तौ | ते |
| मध्यमपुरुषः | त्वम् | युवाम् | यूयम् |
| प्रथमपुरुषः | अहम् | आवाम् | वयम् |

| पुरुषः | एकवचनम् | द्विवचनम् | बहुवचनम् |
|---|---|---|---|
| प्रथमपुरुषः | पठति | पठतः | पठन्ति |
| मध्यमपुरुषः | पठसि | पठथः | पठथ |
| उत्तमपुरुषः | पठामि | पठावः | पठामः |

३. वाक्यानि रचयत -

यथा - सः गच्छति।

| | | | |
|---|---|---|---|
| सः | | | |
| तौ | | अस्ति | |
| ते | घट्यः | पठति | |
| सा | बालिका | अस्मि | |
| ते | नरः | लिखतः | खादावः |
| ताः | महिला | स्तः | पठामः |
| तत् | चित्रम् | गच्छन्ति | गच्छामि |
| ते | घटी | स्थ | हससि |
| तानि | बालिके | सन्ति | धावथः |
| त्वम् | पात्रे | असि | नृत्यथ |
| यूवां | व्यजनानि | स्थः | |
| यूयम् | लेखन्यौ | स्मः | |
| अहम् | | स्वः | |
| आवां | | | |
| वयम् | | | |